# rAmAShTottarashatanAma stotraM

# રામાષ્ટોત્તરશતનામસ્તોત્રમ્

## Document Information

Text title : raamaaShTottarashatanaama stotraM

File name : raama108stAnanda.itx

Category : aShTottarashatanAma, raama, stotra, vAlmIki

Location : doc_raama

Author : Valmiki

Transliterated by : Antaratma antaratma at Safe-mail.net , psaeaswaran at gmail

Proofread by : Antaratma antaratma at Safe-mail.net , psaeaswaran at gmail

Description-comments : from Anandaramayana yAgakANDa panchama sargaH

Latest update : July 4, 2006, August 24, 2014

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

January 30, 2021

*sanskritdocuments.org*

# રામાષ્ટોત્તરશતનામસ્તોત્રમ્

॥ અથ શ્રીમદાનન્દરામાયણાન્તર્ગત શ્રી
રામાષ્ટોત્તરશતનામ સ્તોત્રમ્ ॥

વિષ્ણુદાસ ઉવાચ ।
ગુરો તે પ્રષ્ટુમિચ્છામિ તત્ત્વં વદ સવિસ્તરમ્ ।
કુમ્ભોદરેણ મુનિના યત્સ્તોત્રં સમુદીરિતમ્ ॥ ૧॥

અષ્ટોત્તરશતં નામ્નાં રાઘવસ્ય શુભપ્રદમ્ ।
શ્રવણે તસ્ય મે પ્રીતિર્જાતાઽસ્તિ કથયસ્વ તત્ ॥ ૨॥

શ્રીરામદાસ ઉવાચ ।
શ ृણુ શિષ્ય મહાબુદ્ધે સમ્યક્ પૃષ્ટં ત્વયા મમ ।
અષ્ટોત્તરશતં નામ્નાં રાઘવસ્ય વદામ્યહમ્ ॥ ૩॥

સર્વેશ્વરઃ સર્વમયઃ સર્વભૂતોપકારકઃ ।
સર્વેષામુકારાર્થં યઃ સાકારો નિરાકૃતિઃ ॥ ૪॥

સ ભવત્યેવ લોકેઽસ્મિન્ સંસારભયનાશનઃ ।
યદા યદા હિ લોકાનાં ભયમુત્પદ્યતે તદા ॥ ૫॥

અવતીર્યાકરોચ્છ્રીમાન્ દુષ્ટદૈત્યવિમર્દનમ્ ।
મત્સ્યકૂર્મવરાહાદિરૂપેણ પરમાર્થદૃક્ ॥ ૬॥

તત્કાલેષુ ચ સર્વેષુ સર્વેષામુપકારકૃત્ ।
સાધૂનાં સમચિત્તાનાં ભક્તાનાં ભક્તવત્સલઃ ॥ ૭॥

ઉપકર્તું નિરાકારઃ સદાકારેણ જાયતે ।
અજોઽયં જાયતેઽનન્તો વિશ્રુતો ભૂતભાવનઃ ॥ ૮॥

તદા તદાઽવતરતિ ભક્તાનામનુકમ્પયા ।
ક્ષીરાબ્ધૌ દેવદેવેશો લક્ષ્મીનારાયણો વિભુઃ ॥ ૯॥

આશેષૈઃ શઙ્ખચક્રાભ્યાં દેવૈર્બ્રહ્માદિભિઃ સહ ।
શેષોઽભૂલ્લક્ષ્મણો લક્ષ્મીર્જાનકી શઙ્ખચક્રકે ॥ ૧૦॥
જાતૌ ભરતશત્રુઘ્નૌ દેવાઃ સર્વેઽપિ વાનરાઃ ।
આસન્ પુરૈવ સર્વેઽપિ દેવાનાં ભયશાન્તયે ॥ ૧૧॥

તત્ર નારાયણો દેવઃ શ્રીરામ ઇતિ વિશ્રુતઃ ।
સર્વલોકોપકારાય ભૂમૌ સ્વયમવાતરત્ ॥ ૧૨॥
ધ્યાનમાત્રેણ દેવેશો મહાપાતકનાશકૃત્ ।
કીર્તનશ્રવણાભ્યાં ચ હત્યાકોટિનિવારણઃ ॥ ૧૩॥

કલૌ સ કીર્તનેનૈવ સર્વપાપં વ્યપોહતિ ।
રામ રામેતિ રામેતિ યે વદન્ત્યતિપાપિનઃ ॥ ૧૪॥

પાપકોટિસહસ્રેભ્યસ્તાનુદ્ધરતિ નાન્યથા ।
અષ્ટોત્તરશતં નામ્નાં તસ્ય સ્તોત્રં વદામ્યહમ્ ॥ ૧૫॥

ૐ અસ્ય શ્રીરામચન્દ્રનામાષ્ટોત્તરશતમન્ત્રસ્ય બ્રહ્મા ઋષિઃ ।
અનુષ્ટુપ્ છન્દઃ । જાનકીવલ્લભઃ શ્રીરામચન્દ્રો દેવતા ॥
ૐ બીજમ્ । નમઃ શક્તિઃ । શ્રીરામચન્દ્રઃ કીલકમ્ ।
શ્રીરામચન્દ્રપ્રીત્યર્થે જપે વિનિયોગઃ ॥

ષડઙ્ગન્યાસઃ ।
ૐ નમો ભગવતે રાજાધિરાજાય પરમાત્મને હૃદયાય નમઃ ।
ૐ નમો ભગવતે વિદ્યાધિરાજાય હયગ્રીવાય શિરસે સ્વાહા ।
ૐ નમો ભગવતે જાનકીવલ્લભાય શિખાયૈ વષટ્ ।
ૐ નમો ભગવતે રઘુનન્દનાયામિતતેજસે કવચાય હુમ્ ।
ૐ નમો ભગવતે ક્ષીરાબ્ધિમધ્યસ્થાય નારાયણાય નેત્રત્રયાય વૌષટ્ ।
ૐ નમો ભગવતે સત્પ્રકાશાય રામાય અસ્ત્રાય ફટ્ ।   ઇતિ દિગ્બન્ધઃ ॥

અઙ્ગુલીન્યાસઃ ।
ૐ નમો ભગવતે રાજાધિરાજાય પરમાત્મને અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ નમો ભગવતે વિદ્યાધિરાજાય હયગ્રીવાય તર્જનીભ્યાં નમઃ ।
ૐ નમો ભગવતે જાનકીવલ્લભાય મધ્યમાભ્યાં નમઃ ।
ૐ નમો ભગવતે રઘુનન્દનાયામિતતેજસે અનામિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે ક્ષીરાબ્ધિમધ્યસ્થાય નારાયણાય કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ નમો ભગવતે સત્પ્રકાશાય રામાય કરતલકરપૃષ્ઠાભ્યાં નમઃ ।

અથ ધ્યાનમ્ ।
મન્દારાકૃતિપુણ્યધામવિલસદ્વક્ષસ્થલં કોમલં
    શાન્તં કાન્તમહેન્દ્રનીલરુચિરાભાસં સહસ્રાનનમ્ ।
વન્દેઽહં રઘુનન્દનં સુરપતિં કોદણ્ડદીક્ષાગુરું
    રામં સર્વજગત્સુસેવિતપદં સીતામનોવલ્લભમ્ ॥ ૧૬॥

અથ સ્તોત્રમ્ ।
સહસ્રશીર્ષ્ણે વૈ તુભ્યં સહસ્રાક્ષાય તે નમઃ ।
નમઃ સહસ્રહસ્તાય સહસ્રચરણાય ચ ॥ ૧૭॥

નમો જીમૂતવર્ણાય નમસ્તે વિશ્વતોમુખ ।
અચ્યુતાય નમસ્તુભ્યં નમસ્તે શેષશાયિને ॥ ૧૮॥

નમો હિરણ્યગર્ભાય પઞ્ચભૂતાત્મને નમઃ ।
નમો મૂલપ્રકૃતયે દેવાનાં હિતકારિણે ॥ ૧૯॥

નમસ્તે સર્વલોકેશ સર્વદુઃખનિષૂદન ।
શઙ્ખચક્રગદાપદ્મજટામુકુટધારિણે ॥ ૨૦॥

નમો ગર્ભાય તત્ત્વાય જ્યોતિષાં જ્યોતિષે નમઃ ।
ૐ નમો વાસુદેવાય નમો દશરથાત્મજ ॥ ૨૧॥

નમો નમસ્તે રાજેન્દ્ર સર્વસમ્પત્પ્રદાય ચ ।
નમઃ કારુણ્યરૂપાય કૈકેયીપ્રિયકારિણે ॥ ૨૨॥

નમો દન્તાય શાન્તાય વિશ્વામિત્રપ્રિયાય તે ।
યજ્ઞેશાય નમસ્તુભ્યં નમસ્તે ક્રતુપાલક ॥ ૨૩॥

નમો નમઃ કેશવાય નમો નાથાય શર્ઙ્ગિણે ।
નમસ્તે રામચન્દ્રાય નમો નારાયણાય ચ ॥ ૨૪॥

નમસ્તે રામચન્દ્રાય માધવાય નમો નમઃ ।
ગોવિન્દ્રાય નમસ્તુભ્યં નમસ્તે પરમાત્મને ॥ ૨૫॥

નમસ્તે વિષ્ણુરૂપાય રઘુનાથાય તે નમઃ ।
નમસ્તેઽનાથનાથાય નમસ્તે મધુસૂદન ॥ ૨૬॥

ત્રિવિક્રમ નમસ્તેઽસ્તુ સીતાયાઃ પતયે નમઃ ।
વામનાય નમસ્તુભ્યં નમસ્તે રાઘવાય ચ ॥ ૨૭॥

નમો નમઃ શ્રીધરાય જાનકીવલ્લભાય ચ ।
નમસ્તેઽસ્તુ હૃષીકેશ કન્દર્પાય નમો નમઃ ॥ ૨૮॥

નમસ્તે પદ્મનાભાય કૌસલ્યાહર્ષકારિણે ।
નમો રાજીવનેત્રાય નમસ્તે લક્ષ્મણાગ્રજ ॥ ૨૯॥

નમો નમસ્તે કાકુત્સ્થ નમો દામોદરાય ચ ।
વિભીષણપરિત્રાતર્નમઃ સઙ્કર્ષણાય ચ ॥ ૩૦॥

વાસુદેવ નમસ્તેઽસ્તુ નમસ્તે શઙ્કરપ્રિય ।
પ્રદ્યુમ્નાય નમસ્તુભ્યમનિરુદ્ધાય તે નમઃ ॥ ૩૧॥

સદસદ્ભક્તિરૂપાય નમસ્તે પુરુષોત્તમ ।
અધોક્ષજ નમસ્તેઽસ્તુ સપ્તતાલહરાય ચ ॥ ૩૨॥

ખરદૂષણસંહર્ત્રે શ્રીનૃસિમ્હાય તે નમઃ ।
અચ્યુતાય નમસ્તુભ્યં નમસ્તે સેતુબન્ધક ॥ ૩૩॥

જનાર્દન નમસ્તેઽસ્તુ નમો હનુમદાશ્રય ।
ઉપેન્દ્રચન્દ્રવન્દ્યાય મારીચમથનાય ચ ॥ ૩૪॥

નમો બાલિપ્રહરણ નમઃ સુગ્રીવરાજ્યદ ।
જામદગ્ન્યમહાદર્પહરાય હરયે નમઃ ॥ ૩૫॥

નમો નમસ્તે કૃષ્ણાય નમસ્તે ભરતાગ્રજ ।
નમસ્તે પિતૃભક્તાય નમઃ શત્રુઘ્નપૂર્વજ ॥ ૩૬॥

અયોધ્યાધિપતે તુભ્યં નમઃ શત્રુઘ્નસેવિત ।
નમો નિત્યાય સત્યાય બુદ્ધ્યાદિજ્ઞાનરૂપિણે ॥ ૩૭॥

અદ્વૈતબ્રહ્મરૂપાય જ્ઞાનગમ્યાય તે નમઃ ।
નમઃ પૂર્ણાય રમ્યાય માધવાય ચિદાત્મને ॥ ૩૮॥

અયોધ્યેશાય શ્રેષ્ઠાય ચિન્માત્રાય પરાત્મને ।
નમોઽહલ્યોદ્ધારણાય નમસ્તે ચાપભઞ્જિને ॥ ૩૯॥

સીતારામાય સેવ્યાય સ્તુત્યાય પરમેષ્ઠિને ।
નમસ્તે બાણહસ્તાય નમઃ કોદણ્ડધારિણે ॥ ૪૦॥

નમઃ કબન્ધહન્ત્રે ચ વાલિહન્ત્રે નમોઽસ્તુ તે ।
નમસ્તેઽસ્તુ દશગ્રીવપ્રાણસંહારકારિણે ॥ ૪૧॥ ૧૦૮

અષ્ટોત્તરશતં નામ્નાં રમચન્દ્રસ્ય પાવનમ્
એતત્પ્રોક્તં મયા શ્રેષ્ઠ સર્વપાતકનાશનમ્ ॥ ૪૨॥

પ્રચરિષ્યતિ તલ્લોકે પ્રાણ્યદૃષ્ટવશાદ્દ્વિજ ।
તસ્ય કીર્તનમાત્રેણ જના યાસ્યન્તિ સદ્ગતિમ્ ॥ ૪૩॥

તાવદ્વિજૃમ્ભતે પાપં બ્રહ્મહત્યાપુરઃસરમ્।
યાવન્નામાષ્ટકશતં પુરુષો ન હિ કીર્તયેત્ ॥ ૪૪॥

તાવત્કલેર્મહોત્સાહો નિઃશઙ્કં સમ્પ્રવર્તતે ।
યાવચ્છ્રીરામચન્દ્રસ્ય શતનામ્નાં ન કીર્તનમ્ ॥ ૪૬॥

તાવત્સ્વરૂપં રામસ્ય દુર્બોધં પ્રાણિનાં સ્ફુટમ્ ।
યાવન્ન નિષ્ઠયા રામનામમાહાત્મ્યમુત્તમમ્ ॥ ૪૭॥

કીર્તિતં પઠિતં ચિત્તે ધૃતં સંસ્મારિતં મુદા ।
અન્યતઃ શૃણુયાન્મર્ત્યઃ સોઽપિ મુચ્યેત પાતકાત્ ॥ ૪૮॥

બ્રહ્મહત્યાદિપાપાનાં નિષ્કૃતિં યદિ વાઞ્છતિ ।
રામસ્તોત્રં માસમેકં પઠિત્વા મુચ્યતે નરઃ ॥ ૪૯॥

દુષ્પ્રતિગ્રહદુર્ભોજ્યદુરાલાપાદિસમ્ભવમ્ ।
પાપં સકૃત્કીર્તનેન રામસ્તોત્રં વિનાશયેત્ ॥ ૫૦॥

શ્રુતિસ્મૃતિપુરાણેતિહાસાગમશતાનિ ચ ।
અર્હન્તિ નાલ્પાં શ્રીરામનામકીર્તિકલામપિ ॥ ૫૧॥

અષ્ટોત્તરશતં નામ્નાં સીતારામસ્ય પાવનમ્ ।
અસ્ય સઙ્કીર્તનાદેવ સર્વાન્ કામાન્ લભેન્નરઃ ॥ ૫૨॥

પુત્રાર્થી લભતે પુત્રાન્ ધનાર્થી ધનમાપ્નુયાત્ ।
સ્ત્રિયં પ્રાપ્નોતિ પત્ન્યર્થી સ્તોત્રપાઠશ્રવાદિના ॥ ૫૩॥

કુમ્ભોદરેણ મુનિના યેન સ્તોત્રેણ રાઘવઃ ।
સ્તુતઃ પૂર્વં યજ્ઞવાટે તદેતત્ત્વાં મયોદિતમ્ ॥ ૫૪॥

ઇતિ શ્રીશતકોટિરામચરિતાન્તર્ગતે શ્રીમદાનન્દરામાયણે વાલ્મીકીયે
યાગકાણ્ડે શ્રીરામનામાષ્ટોત્તરશતનામસ્તોત્રં નામ પઞ્ચમઃ સર્ગઃ ॥

Encoded and proofread by
Antaratma antaratma at Safe-mail.net
PSA Easwaran psaeaswaran at gmail

*rAmAShTottarashatanAma stotraM*

pdf was typeset on January 30, 2021

Please send corrections to *sanskrit@cheerful.com*